श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री इन्द्रोपदिष्टम्

# ॥ श्रीमहालक्ष्मीकवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

# ॥ श्रीमहालक्ष्मीकवचम् ॥

अस्य श्रीमहालक्ष्मी कवचमन्त्रस्य ब्रह्मा ऋषिः,
गायत्री छन्दः, महालक्ष्मीर्देवता,
महालक्ष्मी प्रीत्यर्थम् जपे विनियोगः॥

इन्द्र उवाच
समस्तकवचानां तु तेजस्वि कवचोत्तमम्।
आत्मरक्षणमारोग्यं सत्यं त्वं ब्रूहि गीष्पते॥ १॥

श्रीगुरुरुवाच
महालक्ष्म्यास्तु कवचं प्रवक्ष्यामि समासतः।
चतुर्दशसु लोकेषु रहस्यं ब्रह्मणोदितम्॥ २॥

ब्रह्मोवाच
शिरो मे विष्णुपत्नी च ललाटममृतोद्भवा।
चक्षुषी सुविशालाक्षी श्रवणे सागराम्बुजा॥ ३॥

घ्राणं पातु वरारोहा जिह्वामाम्नायरूपिणी।
मुखं पातु महालक्ष्मीः कण्ठं वैकुण्ठवासिनी॥ ४॥

स्कन्धौ मे जानकी पातु भुजौ भार्गवनन्दिनी।
बाहू द्वौ द्रविणी पातु करौ हरिवराङ्गना॥ ५॥

वक्षः पातु च श्रीर्देवी हृदयं हरिसुन्दरी।
कुक्षिं च वैष्णवी पातु नाभिं भुवनमातृका॥ ६॥

कटिं च पातु वाराही सक्थिनी देवदेवता।
ऊरू नारायणी पातु जानुनी चन्द्रसोदरी॥ ७॥

इन्दिरा पातु जङ्घे मे पादौ भक्तनमस्कृता।
नखान् तेजस्विनी पातु सर्वाङ्गं करुणामयी॥ ८॥

www.prapatti.com

ब्रह्मणा लोकरक्षार्थं निर्मितं कवचं श्रियः।
ये पठन्ति महात्मानस्ते च धन्या जगत्त्रये॥ ९ ॥

कवचेनावृताङ्गानां जनानां जयदा सदा।
मातेव सर्वसुखदा भव त्वममरेश्वरि॥ १० ॥

भूयः सिद्धिमवाप्नोति पूर्वोक्तं ब्रह्मणा स्वयम्।
लक्ष्मीर्हरिप्रिया पद्मा एतन् नामत्रयं स्मरन्॥ ११ ॥

नामत्रयमिदं जप्त्वा स याति परमां श्रियम्।
यः पठेत्स च धर्मात्मा सर्वान् कामान् अवाप्नुयात्॥ १२ ॥

॥ इति श्रीमहालक्ष्मीकवचं समाप्तम् ॥

www.prapatti.com